॥ श्रीः ॥

श्रीमद्यास्कमुनिप्रणीतम्

( कश्यपप्रजापतिनिघण्टु-भाष्यरूपम् )

# निरुक्तम्

श्रीमद्भगवद्दुर्गाचार्यकृत-ऋज्वर्थाख्यव्याख्यानुसारिण्या
पं मुकुन्दझाबख्शी-प्रणीतया निरुक्तविवृत्या समलङ्कृतम्


प्रधानसम्पादकः
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः

सम्पादकः
प्रो. मनोजकुमारमिश्रः
वेदविभागाध्यक्षः



राष्ट्रियसंस्कृतसंस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
नवदेहली

॥ श्रीः ॥

श्रीमद्यास्कमुनिप्रणीतम्

( कश्यपप्रजापतिनिघण्टु-भाष्यरूपम् )

# निरुक्तम्

श्रीमद्भगवद्दुर्गाचार्यकृत-ऋज्वर्थाख्यव्याख्यानुसारिण्या
पं मुकुन्दझाबख्शी-प्रणीतया निरुक्तविवृत्या सनाथीकृतम्

प्रधानसम्पादकः

**प्रो. परमेश्वरनारायणशास्त्री**

कुलपतिः

सम्पादकः

**प्रो. मनोजकुमारमिश्रः**

वेदविभागाध्यक्षः

## राष्ट्रियसंस्कृतसंस्थानम्

**मानितविश्वविद्यालयः**

( भारतशासन-मानवसंसाधनविकास-मन्त्रालयाधीनम् )

**नवदेहली**

# विषयानुक्रमणिका


| | |
|---|---|
| पुरोवाक् | iii |
| आत्मनिवेदनम् | v |
| प्रस्तावना | vii |
| **विषया:** | **पृष्ठाङ्का:** |
| प्रथमोऽध्याय: | 1-117 |
| द्वितीयोऽध्याय: | 118-224 |
| तृतीयोऽध्याय: | 225-329 |
| चतुर्थोऽध्याय: | 330-434 |
| पञ्चमोऽध्याय: | 435-551 |
| षष्ठोऽध्याय: | 552-697 |
| सप्तमोऽध्याय: | 698-806 |
| अष्टमोऽध्याय: | 807-849 |
| नवमोऽध्याय: | 850-899 |
| दशमोऽध्याय: | 900-967 |
| एकादशोऽध्याय: | 968-1030 |
| द्वादशोऽध्याय: | 1031-1090 |
| त्रयोदशोऽध्याय: | 1091-1107 |

स्तुवन्ति। नै० धातुः। कथम्। **'नग्नाः'** (भूत्वा स्त्रियं संप्रयोक्ष्यामह इत्येवमभिप्रायाः) **'ऊधर्न'** ऊध इव रात्रिं यथा॥ सायणस्तु हे इन्द्र, त्वया पीताः सोमास्त्वां मादयितुं हृत्सु त्वदीयेषु युध्यन्ते परस्परं संप्रहारं कुर्वते। अत्र दृष्टान्तः "दुर्म० याम्" सुरायां पीतायां जायमाना दुष्टमदा यथा पातारं मादयन्ति तद्वत्। अपि च नग्नाः स्तोतारस्ते च ऊधर्न पयसा पूर्णं गवादेरूध इव सोमपूर्णं त्वां जरन्ते स्तुवन्तीत्येवं व्याख्यत्॥

**द्वितीयस्य लक्षणमाह–**

**उपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते॥ १॥**

येनार्थेन उपमेयमर्थमुपमिमीते स उपमार्थ एव **उपमार्थीयस्तस्य। उपरिष्टा**दुपरि। शेषं पूर्ववदूह्यम्॥ १॥

**चिदित्येषोऽनेककर्मा॥**

कर्मशब्दोऽर्थपर्यायवचनः। अनेकार्थोऽपि सन्नुपमार्थीयसंयोगादत्रोदाहृतः। कथमनेकार्थ? इति तमेवार्थविशेषमुदाहरणद्वारा दर्शयति–

**आचार्यश्चिदिदं ब्रूयादिति पूजायाम्॥**

आचार्य एवं ब्रूयात्कोऽन्य एवं वक्ष्यति। उदाहरणप्रसक्तमाचार्यपदं निर्वक्ति–

**आचार्य आचारं ग्राहयति[१]-आचिनोत्यर्थान् आचिनोति बुद्धिमिति वा॥**

आङ्पूर्वाच्चरतेरन्तर्भावितण्यर्थाद्बाहुलकात्कर्तरि "ऋहलोर्ण्यदि"-(पा० ३.१.१२४) ति ण्यत्। उपधावृद्धिराद्यकल्पे। कल्पान्तरे त्वौणादिको ण्यद्वृद्धिर्धातोरन्त्यस्यात्वमुगागमश्चेति साधनप्रक्रियोह्या॥

**दधिचिदित्युपमार्थे॥**

अत्रौदन इति वाक्यशेषः। दधितुल्यस्तद्रूप इत्यर्थः॥

**कुल्माषाँश्चिदाहरेत्यवकुत्सिते॥**

**अवकुत्सिते** भृशं कुत्सिते। **कुल्माषा**नपि तावद**ाहरेति** किं वाऽन्यदाहरिष्यसि॥ कुल्माषपदं निर्ब्रवीति–

---

१. तथा च मनुः। "उपनीय तु यः शिष्यं वेदमध्यापयेद् गुरुः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते" इति अन्यत्रापि। "आम्नायतत्त्वविज्ञानाच्चराचरसमानतः। यमादियोगसिद्धत्वादाचार्य इति कथ्यते" इत्येवंलक्षणक्षितो मतप्रस्थापकोऽप्याचार्यः। स हि जनानां बुद्धिमाचिनोत्यनुकृष्यैकत्र लगयतीति आचार्य इत्युच्यते॥